18-08-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । तद्धित प्रत्ययः ।

अण् प्रत्ययः →

1. पाण्डवः → पाण्डु + अण् = पाण्डोः अपत्यम् (संतान)
राघवः → रघु + " → रघोः "
शैव : → शिव + " → शिवस्य "
वाशिष्ठः → वशिष्ठ + " → वशिष्ठस्य "
माधव : → मधु + " → मधोः "
सारस्वतः → सरस्वती + " → सरस्वत्याः "
शाक्तः → शक्ति + " → शक्त्या (शक्तेः) "
बौद्धः → बुद्ध + " → बुद्धस्य "
यादवः → यदु + " → यदोः "
वासुदेवः → वसुदेव + " → वसुदेवस्य "
माथुर : → मथुरा + " → मथुरायाः "
पौत्र : → पुत्र + " → पुत्रस्य "
दानवः → दनु + " → दनोः "
जैन : → जिन + " → जिनस्य "
कौरव : → कुरु + " → कुरोः "
बान्धवः → बन्धु + " → बन्धोः "
मानव : → मनु + " → मनोः "
वैष्णवः → विष्णु + " → विष्णोः अपत्यम् ।

18-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

18-08-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । अनुवादं संस्कृते कुरुत ।

1. भारत में अनेक महापुरुष हुए → भारते अनेकाः महापुरुषाः अभवन् ।
2. भारत के लोग शान्तिप्रिय होते हैं → भारतीयजनाः शान्तिप्रियाः भवन्ति ।
3. भारतवर्ष देवताओं का जन्मस्थल है → भारतवर्षं देवानां जन्मस्थलमस्ति ।
4. परिश्रम के विना धन नहीं होगा → परिश्रमं / परिश्रमेण विनाधनं न भविष्यति ।
5. आजकल धन का बहुत महत्व है → अधुना धनस्य अधिकं महत्वमस्ति ।
6. धन से ही धर्म होगा → धनादेव धर्मं भविष्यति ।
7. दूसरों की भलाई करनी चाहिए → अपरेषामुपकारं करणीयम् ।
8. आपस में विवाद मत करो → परस्परं (निजयोर्मध्ये) विवादं मा कुरु ।
9. ज्ञानहीन मनुष्य पशु के समान होता है → ज्ञानेन हीनः (ज्ञानहीनः) मनुष्यः पशुभिः सदृशं (पशुसदृशं) भवति ।
10. छात्रों को ध्यान से पढना चाहिए → छात्राः ध्यानेन पठेयुः । छात्रैः ध्यानेन पठितव्यम् ।
11. उसे घर जाना चाहिए → ते गृहं गच्छेयुः । तेन गृहं गन्तव्यम् ।
12. तुम्हें दूध पीना चाहिए → त्वं दुग्धं पिबेः । त्वं दुग्धं पातव्यम् ।
13. लड़कों ने पुस्तक पढी → बालकाः पुस्तकानि अपठन् । बालकैः पुस्तकानि पठितानि ।
14. संस्कृत देवभाषा है → संस्कृतं देवभाषाऽस्ति ।
15. हिमालय सभी पर्वतों में ऊँचा है → हिमालयः सर्वेषु पर्वतेषु / सर्वेषां पर्वतानां उच्चैः अस्ति ।

(signature) 18-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम् । शास्त्री 18-08-2020

व्याकरणछात्रेभ्यः । रघुवंशम् । श्लोकव्याख्या ।

" तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् ।
वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद ॥ "

**सन्दर्भः** → पूर्ववत् ।

**प्रसङ्गः** → कविरत्रेन्दुमत्याः रघुसुतस्याजस्य समीपे गमनमङ्गल-
-निमित्तसूचकं प्रकाशयति ।

**अन्वयः** → तस्याम् उपस्थितायां रघोः सूनुः मां वृणीत न वा इति
समाकुलः अभूत् । अस्य वामेतरः बाहुः केयूरबन्धोच्छ्वसितैः
संशयं नुनोद ।

**शब्दार्थः व्याकरणञ्च** → तस्याम् = इन्दुमत्याम् । उपस्थितायाम् =
आसन्नायाम् । रघोः सूनुः = रघुसुतः, अजः ।
मां = अजम् । वृणीत = वरयेत् । इति = इत्थं । न = नहि ।
समाकुलः = संशयापन्नः । अभूत् = जातः । वामेतरः = दक्षिणः ।
बाहुः = भुजः । केयूरबन्धोच्छ्वसितैः → केयूरस्य बन्धस्य
उच्छ्वसितानि, तैः = अङ्गदस्थानस्फुरणैः । संशयम् = सन्देहम् ।
नुनोद = दूरीकृतवान् । वामेतरः → वाम+इतरः, वामात् इतरः = दक्षिणः

**तात्पर्यः** → इन्दुमती अजस्य समीपे यदा आगता तदा अजः 'मां वरिष्यति
न वा इति' सन्देहयुक्तो बभूव किन्तु सद्य एव स्पन्दित-
दक्षिणभुजः तस्य संशयं निवारयामास ।

**विशेषः** → शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, काव्यलिङ्गमलङ्कारः
उपजातिछन्दश्च ।

(हस्ताक्षर) 18-08-2020

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ